This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।श्रीगणेशायनमः।।स्मृतिचन्द्रिकायांआन्हिककांडे।।अथाग्निहोत्रादिमहिमा।।तत्रप्रजापतिः।।आ
ग्निहोत्रफलावेदाः सषडंगपदक्रमाः।।अग्निहोत्रसमोधर्मोनभूतोनभविष्यति।।हारीतोपि।।नाग्निहो
त्रात्परोधर्मोनाग्निहोत्रात्परंतपः।।नाग्निहोत्रात्परंस्नानंनाग्निहोत्रात्परोदमः।।नाग्निहोत्रात्परंश्रेयोना
ग्निहोत्रात्परंयशः।।नाग्निहोत्रात्परासिद्धिर्नाग्निहोत्रात्परागतिः।।नाग्निहोत्रात्परंस्थानंनाग्निहोत्रात्प
रंव्रतं।।निर्द्वंद्वानिनमस्कारापद्युपायन्मनीषिणः।।योयंसूक्ष्मोग्निहोत्रेषुगूढोग्निर्विवराहुषु।।शुक्ति
येषुरहस्येषुनिषत्सूपनिषत्सुच।।येपश्यंतिमहात्मानःसोग्निहोत्रप्रकाशते।।सुहुतान्यग्निहोत्राणिन
यंतिपरमांगतिं।।अत्रस्वर्गश्चमोक्षश्चयोयथागंतुमिच्छति।।आशाव्याहृतयस्तिस्रः स्वधास्वाहानमो
वषट्।।यस्यैतेवेश्मनिसदाब्रह्मलोकःसएवसः।।अंगिराअपि।।योदद्यात्कांचनंमेरुंपृथिवींचससाग
रां।।तत्सायंप्रातर्होमस्यतुल्यंभवतिवानवा।।सत्यव्रतोपि।।जीवितोहिद्विजोजाम्यामहन्यहनियत्फ
लं।।तद्दर्शपूर्णमासाभ्यांसम्यगाप्नोतिवैद्विजः।।वायुपुराणेपि।।दर्शंचपूर्णमासंचयेयजंतिद्विजातयः।।न १

तेषांपुनरावृत्तिर्ब्रह्मलोकात्कदाचन।।पैठीनसिरपि।।हुताग्निहोत्रस्यहुताग्निकस्यसमानजप्यस्यपथि
स्थितस्य।।यद्ब्राह्मणस्याग्निब्रह्मवीर्यंनतत्क्षोभ्यतेवैऋषयःसमस्ताः।।हारीतोपि।।नास्तियज्ञस्यलोको
वैनायज्ञोविंदतेशुभं।।अनिष्टयज्ञोपूतात्माभ्रश्यतिछिन्नपर्णवत्।।यज्ञेनलोकाविमलाविभांतियज्ञेन
देवाअमृतमाप्नुवंति।।यज्ञेनपापैर्बहुभिर्विमुक्तःप्राप्नोतिलोकान्यमहस्यविष्णोः।। ।।इतिस्मृतिचन्द्रिका
यांअग्निहोत्रमाहिमा।। ।।अथकर्माणि।।तत्रमनुः।।वेदोदितंस्वकंकर्मनित्यंकुर्यादतंद्रितः।।तद्धिकुर्वन्यथा
२ शक्तिप्राप्नोतिपरमांगतिं।।एतत्स्मार्तस्यापिमहर्षभार्थं।।अतएवविष्णुः।।श्रौतंस्मार्तंचयत्किंचिद्विधानंस चि
र्वमादरात्।।गृहेनिवसताकार्यमन्यथाहोयमश्नुति।।स्मार्तंगृह्योक्तमौपासनादिनतुद्वैरिग्नौकार्यं।।तथा के
चयाज्ञवल्क्यः।।कर्मस्मार्तंविवाहाग्नौकुर्वीतप्रत्यहंगृही।।दायादिनाहृतोवापिश्रौतंवैतानिकाग्निषु
।।श्रौतमग्निहोत्रादि।।वैतानिकगार्हपत्यादयः।।गौतमोपि।।भार्यादिरग्निर्दायादिर्वातस्मिन्गृह्यकर्मणी
ति।।दायादःपितृधनं।।अत्रभार्यादिरितियथास्वगृह्यव्यवस्था।।एवंचयदुक्तंगार्ग्येण।।कृतदारोनैवतिष्ठेत्क्षण

K K S U LIBRARY
RAMTEK
441 106
M-1253
Dist Nagpur

Accession NO: ~~8689~~ M1253
Title: स्मृतिचन्द्रिका
पेज 20
(1)

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णमप्यग्निनाविना॥ तिष्ठेच्चेनद्विजोग्रात्यःतथाचपतितोभवेत्॥ यथास्नानंयथाभार्यावेदस्याध्ययनंतथा॥ तथैवोपासनंदुष्टनास्तिकस्तद्विधोगतः॥ यदपिवशिष्ठेन॥ अश्रोत्रियाअननुवाक्याअनग्नयःशूद्रसधर्मणोभवंतीति॥ यदपिव्यासेन॥ योगृहीतविवाहाग्निंगृहस्थइतिमन्यते॥ अन्नंतस्यनभोक्तव्यंवृथापाकोहिसस्मृतः॥ तदधिकारप्राप्तौसत्यांवेदितव्यं॥ अश्रोत्रियोवेदरहितः॥ अनुवाक्यमनुवचनं॥ तद्विनाअनुवाक्यास्तानरहिताइत्यर्थः॥ तत्रगर्गः॥ योवैदिकमनादृत्यकर्मस्मार्तंतिहिंसिकं॥ मोहात्समाचरेद्विप्रोनसपुण्येनयुज्यते॥ प्रधानंवैदिकंकर्मगुणभूतंतथेतरं॥ गुणभूतंप्रधानंहिहित्वागच्छत्यधोगतिं एतद्धिंसानवैदिकस्मार्तविषयं॥ अनएवव्यासः॥ श्रौतंकर्मनचेच्छक्तःकर्तुंस्मार्तंसमाचरेत्॥ तत्राप्यशक्तःकरणेसदाद्धपदरति॥ अनेनसतिसामर्थ्येभवितव्यं॥ वैदिकेफलंभवति॥ तदुक्तंवशिष्ठेन॥ अलमग्न्याधेयायनामाहिताग्निःस्यादलंचसोमायनासोमयाजीति॥ अलंसमर्थइत्यर्थः॥ सामर्थ्यंचात्रानाहिताग्निपितराहित्यादि॥ अस्याध्ययनादिसामर्थ्यमस्तितथैवानाहिताग्निना॥ स्वेभमिस्यादिरोपोनान्यस्येत्यनु २

संधेयं॥ तत्रवशिष्ठः॥ अवश्यंब्राह्मणोग्नीनादधीतदर्शपूर्णमासाग्रयणेष्टिचातुर्मास्यपशुसोमैश्चयजेतेति॥ हारितोपि॥ पाकयज्ञांश्चयोनित्यंहविर्यज्ञांश्चनित्यशः॥ सौम्यांश्चविधिपूर्वेणयइच्छेद्धर्ममव्ययं॥ तेचगौतमेनदर्शिताः॥ अष्टकापार्वणश्राद्धश्रावण्याग्रहायणीचैत्र्याश्वयुजीतिसप्तपाकयज्ञसंस्था॥ अग्न्याधेयमग्निहोत्रंदर्शपूर्णमासौचातुर्मास्यान्याग्रयणेष्टिनिरूढपशुबंधःसौत्रामणीतिसप्तहविर्यज्ञसंस्था॥ अग्निष्टोमोत्यग्निष्टोमउक्थ्यःषोडशीवाजपेयोतिरात्रोप्तोर्यामइतिसोमसंस्थाइतिपार्वणंपर्वणिक्रियमाणंस्थालीपाकलक्षणं॥ श्राद्धंमासिश्राद्धं॥ श्रावणीसर्पबलिः॥ आग्रहायणीआग्रयणं॥ चैत्रीहोलकाख्यंकर्म॥ आश्वयुजीइंद्रध्वजहोमाख्यंकर्म॥ अन्येप्रसिद्धाः॥ केचिदौपासनहोमोवैश्वदेवंपार्वणमष्टकामासिश्राद्धंसर्पबलिरीशानबलिरितिसप्तयज्ञानाहुः॥ एवमेकविंशतिसंख्यायज्ञमभिधायदेवलः॥ वाजपेयाश्वमेधराजसूयपौंडरीकगोसवादयोमहायज्ञाःक्रतवइति॥ अत्रकालनिर्णयमाह मनुः॥ अग्निहोत्रंतुजुहुयादाद्यंतेद्युनिशोःसदा॥ दर्शेनचार्द्धमासांतेपौर्णमासेनचैवहि॥ सस्यांतेनवसस्येष्ट्यात

2

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भास्यंतेद्विजोध्वरैः॥पशुनात्वयनस्यांते वसंतेसौमिकैर्मखैः॥आद्यंतेद्युनिशोः सायंप्रातः संध्ययोरित्यर्थः॥
अध्वरैश्चातुर्मास्यैः सस्यमुक्तोनवेष्ट्यातु॥चातुर्मास्यैस्ततोमुखमितिजाबालिस्मरणात्।तत्रानुकूल्यमाह
याज्ञवल्क्यः॥अग्निहोत्रंतुजुहुयादाद्यंतेद्युनिशोःसदा॥दर्शेनचार्द्धमासांतेपौर्णमासेनचैवहि॥प्रतिसंव
त्सरेसोमैःपशुमस्ययनंतथा॥कर्माण्याग्रयणेष्टिश्चचातुर्मास्यानिचैवहि॥एषामसंभवेकुर्यादिष्टिंवैश्वा
नरींद्विजः॥एषांसोमादीनांकथंचिदसंभवेप्रतिनिधित्वेनतत्कालएवपृथक्पृथगेतामिष्टिंनिर्वपेदित्यर्थः
ततत्कार्यकारणत्वेनतद्धर्मत्वाभावात्प्रतिनिधिनद्धर्मवत्त्वादिसापस्तंबस्मरणात्॥ननुएवंनहिंसोमिका
दिविध्यंतरप्राप्तिःस्यात्॥मैवमग्निहोत्रादिशब्दवदिष्टिशब्दस्यात्तरंगेषमास्यर्थत्वात्॥पत्युनर्भगुनो
क्तं॥इष्टिंवैश्वानरींनित्यांनिर्वपेदब्दपर्यये॥क्लृप्तानांपशुसोमानांनिष्कृत्यर्थमसंभवे॥तदपिपश्वादिकार्यए
वेष्टिविधानपरं॥नपुनस्तदकरणेप्रायश्चित्तविधानार्थं॥निःकृतिःसोमादिकार्यनिष्पत्तिः॥यद्येवंतर्हिवै
श्वानरेष्ट्येवालंकिमन्यैरित्यानंतरमाहसएव॥आपत्कालेनयोधर्मंकुरुतेनापदिद्विज॥सनाप्नोतिफलं ३

तस्यपरत्रेतिविचारितं॥विश्वैर्वैश्वसाध्यैश्चब्राह्मणैश्चमहर्षिभिः॥आपदिस्मरणाद्भीतैर्विधिप्रतिनि
धिःकृतः॥विधेर्मुख्यस्येत्यर्थः॥अतोनिष्कृतिग्रहणेपिवैश्वानरेष्टिप्रतिनिधित्वेनप्रायश्चित्तमित्यनुसंधे
यं॥एतेषांनित्यत्वमप्युक्तंभवति॥अकरणेप्रायश्चित्तविधानात्॥उक्तंचप्रजापतिना॥कालेत्वाध्यायक
र्माणि [illegible] अग्रवासीविशेषतः॥तदकुर्वंस्त्रिरात्रेणमासिमासिविशुध्यति॥दर्शपूर्णमासीचातुर्मास्यायोभय
मेववा॥एकस्य [illegible] कृच्छ्रंपादेनद्वयोर्द्वेनशोधनं॥हविर्यज्ञेषुचैकस्यचतुस्त्रमप्येकमादितः॥प्राजापत्येनशु
ध्येतपाकसंस्थाश्चचैवहि॥संध्योपासनहानौतुनित्यकर्मविलोपच॥होमंचनैत्यकंशुध्येत्प्रायश्चित्तसहस्र
गा कृत्॥समांतसोमयागानांहानौचान्द्रायणंचरेत्॥अकृत्वान्यतमंयज्ञंपंचयज्ञाधिकारतः॥उपवासेनशुध्येत्पा त
कसंस्थाश्चचैवहि॥कात्यायनोपि॥पितृयज्ञात्ययेचैववैश्वदेवद्वयस्यच॥उशनानिषेधमाह॥नाग्निष्ठान
वसस्येष्ट्यापशुनावाग्निमान्द्विजः॥नचान्नमद्यमांसंवादीर्घमायुर्जिजीविषुरिति॥अयंचनवान्नानिषेधो
यक्ष्यमाणव्रीह्याद्यभिप्रायेणआपस्तंबः॥यदकृत्वाग्रयणंनवस्यमश्नीयाद्वैश्वानरंभागंप्रकृतिकृतिमया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हार्त्तिमाच्छेदिति॥ विष्णुरपि॥ नवयज्ञाधिकारस्त्वश्यामाकाव्रीहयोयवाः॥ अकृत्वाग्रयणेनाद्यास्त्वेषुनि
यमस्मृतः॥ अत्रकालनियममाहआपस्तंबः॥ वर्षासुश्यामाकैर्यजेतशरदिव्रीहिभिर्वसंतेयवैः॥ अन्यत्तु
वेणुयवैरिति॥ श्रुतिरपि॥ गृहमेधीव्रीहियवाभ्यांशरद्वसंतयोर्यजेतश्यामाकैर्वर्षास्वापत्कल्पेन्योमेनपु
रावेर्वेति॥ अत्रकूर्मपुराणं॥ नास्तिक्यादथवालस्याद्योग्निंनाधातुमिच्छति॥ यजेतवानयज्ञेनसयातिनरका
न्बहून्॥ तस्मात्सर्वप्रयत्नेनब्राह्मणोहिविशेषतः॥ आधायाग्निंविशुद्धात्मायजेतपरमेश्वरं॥ ॥इतिस्मृ
तिचंद्रिकायांकर्माणि॥ ॥उक्तान्याधानादीनिकर्माणि॥ अधुनात्रतत्राधिकारीनिरूप्यते॥ तत्रवशिष्ठः॥
अलमग्न्याधेयायनानाहिताग्निःस्यादलंचसोमायनासोमयाजीति॥ अलंसमर्थइत्यर्थः॥ तत्र[redacted]सा
न मर्थ्यंयाज्ञवल्क्येनदर्शितं॥ त्रैवार्षिकाधिकान्नोयःसहिसोमंपिबेद्द्विजः॥ वर्षत्रयंयावत्कुटुंबभरणपर्या
प्तमन्नमधिकंवायस्यास्तिससोमंपिबेत्सोमेनयजेदित्यर्थः॥ तथाचमनुः॥ यस्यत्रैवार्षिकंभक्तंपर्याप्तंभृ
त्यवृत्तये। अधिकंवापिविद्येतससोमंपातुमर्हति॥ एतत्काम्यसोमयागाभिप्रायं॥ ऋणापाकृतेनित्यस्याव ४

श्यकर्त्तव्यत्वाकरणेप्रायश्चित्तविधानाच्च उक्तंचानंतरमेवमनुना॥ अतस्त्वल्पीयसिद्रव्येयःसोमंपिब
तिद्विजः॥ अपीतसोमपूर्वोपिनतस्याप्नोतितत्फलं॥ अतउक्तास्त्वल्पीयसिद्रव्येयःपूर्वमकृतसोमयागःसो
पितस्यनित्यस्यफलंनाप्नोतिकिमुतकाम्यस्येत्यर्थः॥ अतोनाल्पधनःकाम्यसोमयागंकुर्यात्॥ अनेनैवा
भिप्रायेणशंखोपि॥ त्रैवार्षिकाधिकान्नोपिपिबेत्सोममतन्द्रितः॥ इष्टिंवैश्वानरींकुर्यात्तथैवाल्पध
नोद्विजः॥ इष्टिग्रहणंसोमाप्राचीनाग्निहोत्रादिकर्मोपलक्षणार्थं॥ अतएवयाज्ञवल्क्यः॥ प्राक्सो
मिकाःक्रियाःकुर्याद्यस्यान्नंवार्षिकंभवेत्॥ प्राक्सोमोद्भवाःप्राक्सौमिकाः॥ मनुरपि॥ पुण्या
न्यन्यानिकुर्वीतश्रद्दधानोजितेन्द्रियः॥ नत्वल्पदक्षिणैर्यज्ञैर्यजेतेहकथंचन॥ इन्द्रियाणियशःस्व
र्गमायुःकीर्तिंप्रजांपशून्॥ हन्त्यल्पदक्षिणोयज्ञस्तस्मान्नाल्पधनोयजेत्॥ मत्स्यपुराणेपि॥ अन्न
हीनोदहेद्राष्ट्रंमंत्रहीनस्तथाऋत्विजः॥ दक्षिणायजमानंनास्तियज्ञसमोरिपुः॥ अन्नपरिमाणमपिशंखे

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नो क्त। सहस्त्रं भोजयेत्सोमे ब्राह्मणानां शतं पशौ। चातुर्मास्येषु सर्वेषु शतं पर्वणि
पर्वणि। यत्तु स्मृतौ। शतं चैव परं दक्षिणा भवत्यप्यल्पिकापीति। तन्नित्याभि
प्रायं। अत एव बौधायनः॥ यस्य नित्यानि लुप्तानि तथैवाजस्त्रिकाणि च। वि
पतत्सोऽहिनं स्वर्गं गच्छेत्तु पतितो हि सः॥ तस्मात्कंदैः फलैर्मूलैर्मधुनातरसा
पि वा। नित्यं नित्यानि कुर्वीत न च नित्यानि लोपयेत्। तेनाल्पधनस्यापि नित्य
सोमेऽधिकार इति सिद्धं। एवमाधानेऽपि द्रष्टव्यं तथा च प्रजापतिः॥ सर्वसंस्था
ऽधिकारी स्यादाहिताग्निर्धनेति। आदध्याग्निं ईनोऽप्यग्निं न तु पापभयाद्विजः
आनाहिताग्निः संस्थाऽधिकारी किंतु धने सत्येव तासां काम्यत्वाग्निर्धनोऽल्प

५

धन इत्यर्थः। मनुरपि। प्राजापत्यमदत्त्वाश्वमग्न्याधेयस्य दक्षिणा॥ अनाहिताग्नि
र्भवति ब्राह्मणो विभवे सति। अविभवे ब्राह्मणोऽश्वमदत्त्वाप्याहिताग्निर्भवतीति
भावः। अत एवापस्तंबः। यद्यनाढ्योऽग्नीनादधीत काममेवैकीं दद्यादिति। अत्र का
लनियममाह विष्णुः। यदहरेवैनं श्रद्धोपनमेत्तदहरेवादधीतेति। कात्यायनि
रपि। पुत्रमुत्पाद्य कर्मैतत् कुर्याद्वैनिकी द्विजः। यथाकथं चिदादध्यात्प्राप्तं चेत्सा
धुतो धनं। साधुग्रहणं शूद्रादिव्युदासार्थं। अत एव मनुः॥ ये शूद्राद धिगम्यार्थ
मग्निहोत्रमुपासते। ऋत्विजस्ते हि शूद्राणां ब्रह्मवादिषु गर्हिताः॥ तेषां सततम
ग्नीनां वृषलाग्न्युपसेविनां। पदा मस्तकमाक्रम्य दाता दुर्गाणि संतरेत्। अनेना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धानपूर्वकमग्निहोत्रं निषिध्यताग्निहोत्रस्यमात्रं वृषलाग्न्युपसेविनामिति॥
शूद्राग्निस्ववचनात्॥ यमोपि॥ उपादाय धनं शूद्राद्यो ग्निहोत्रमुपासते॥ दाता
तत्फलमाप्नोति कर्त्ता च नरकं व्रजेत्। एवं यज्ञार्थेपि धनं द्रव्यं। तत्रापि दोषश्र
वणात्। तथा च यमः धर्मवि ब्राह्मणः शूद्राद्यज्ञार्थं नाहरेद्धनं॥ जायते प्रेत चां
डालः शूद्रायेने छद्रव्रत॥ मनुरपि॥ न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत धर्मवित्॥
यजमानस्त्वपि भिक्षित्वा चाण्डालः प्रेत जायते। याज्ञवल्क्योपि चांडालो जायते यज्ञः
करणः शूद्रभिक्षणात्। शंखोपि। न शूद्रं तु धनं भिक्षेत्सर्वदेयं च भक्षितं॥ अने
नाथीदसर्वदानं निषिद्धमित्युक्तं भवति॥ अत एव मनुः। यज्ञार्थमर्थं भिक्षि ६

त्वा यो न सर्वं प्रयच्छति। स याति भासतां विप्रः काकतां वा शतं समाः॥ यमोपि पथार्थं
भिक्षितं द्रव्यं यः सर्वं नोपयोजयेत्। स काकयोनौ जायेत तत्तद्भुक्त्वा तु दुर्गतिः। य न
त्तु तु पक्रांत यज्ञमध्ये कथंचित् पश्चाद्धमसंभवेन यज्ञ प्रतिवद्धस्तदा शूद्रादे
स्तदाहर्त्तव्यमित्याह मनुः॥ यज्ञश्चेद्प्रतिबद्धस्यादेकेनांगेन यज्वनः॥ ब्राह्मण
स्य विशेषेण धार्मिके सति राजनि। यो वैश्यस्याद्बहुपशुर्हीनक्रतुरसोमपाः। कु
टुंबात्तस्य तद्द्रव्यमाहरेद्यज्ञसिद्धये॥ आहरेत्त्रीणि वा द्वे वा कामं शूद्रस्य वेश्मनः।
नहि शूद्रस्य यज्ञेषु कश्चिदस्ति परिग्रहः॥ योनाहिताग्निशतगुरयज्वा च सहस्र
गुः॥ तयोरपि कुटुंबाभ्यामाहरेदविचारयन्निति॥ ॥ इति स्मृति चंद्रिकायां

(8)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मधिकारनिरूपणं। अथ होमविधिः। तत्र दक्षः॥ सांध्यकर्मावसाने तु स्वयं होमो विधीयते। स्वयंहोमे फलं यस्यात्तदन्येन न लभ्यते। किं तर्हि अन्यहोमफलमित्यपेक्षते। स एवाह। होमे यत्फलमुद्दिश्य जुहुतः स्वयमेव तु। हूयमाने तदन्येन फलमर्द्धं प्रपद्यते। अत्र कर्तृत्वनियममाह शौनकोपि। पाणिग्रहणादिगृह्यं परिचरेत्स्वयं पत्न्यपि वा पुत्रः कुमार्यंतेवासी वेति। अंतेवासी शिष्यः। दक्षोपि। ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोथ विट्पतिः। एतैरपि हुतं यत्स्यात्तद्धुतं स्वयमेव तु॥ विट्पतिर्जामाता॥ आपस्तंबोपि। अहरहर्यजमानः स्वयमग्निहोत्रं जुहुयात्। पर्वणि वा ब्रह्मचारी जुहुयात् ब्रह्मणा परिक्रीतं ते भवति बह्वृचब्राह्मणमिति॥ ८

अत्र विशेषमाह विष्णुः। स्वयमहुत्वा न परं याजयेदिति। कूर्मपुराणेपि। ऋत्विक्पुत्रोथ वा पत्नी शिष्यो वापि सहोदरः। प्राप्यानुज्ञां विशेषेण जुहुयाद्वा यथाविधि। एतत्सर्वं स्वयंहोमालाभविषयं। तस्यैव प्रशस्तत्वात्। तथा च स्मृतिः। अन्यैः शतहुताद्धोमादेकः श्रेयान्स्वयंकृत इति। यत्पुनर्मनुनोक्तं। नैव कन्या न युवतिर्नाल्पविद्यो न बालिशः। होता स्याद्अग्निहोत्रस्य नार्तो नासंस्कृतस्तथा। नरके हि पतंत्येते जुह्वतः स च यस्य तु॥ तस्माद्वैतानकुशलो होता स्याद्वेदपारग इति। तच्छ्रौताग्निविषयं। अग्निहोत्रग्रहणात्। अतो न शौनकोक्तविरोधः। कन्याग्रहणं पत्न्या अपि प्रदर्शनार्थं। अत एव गोभिलः। कामं गृह्येग्नौ पत्नी जुहुयात्सायंप्रातर्होमाविति। ऋत्विगा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(7)

दि होमे पि यजमानसन्निधानेन भवितव्यमित्युक्तं भवति। अत एव कश्चित्प्रवासानुग्रह
स्तेनैव दर्शितः। निक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्विजस्तथा। प्रवसेत्कार्यवान्विप्रो
वृथैव न चिरं वसेत्। अत्र यज्ञपार्श्वः। दुहित्रा स्नुषया वापि विहारो न विरुध्यते॥ निर्ले
पनं च पात्राणामुपलेपनमार्जनं। विहारो विहरणं॥ अत्र कालनियममाह कात्यायनः॥
सूर्ये स्तमयं प्राप्ते षट्त्रिंशद्गुलैः॥ प्रादुष्करणमग्नीनां प्रातर्भासां च दर्शनात्॥
प्रादुष्करणं विहरणं॥ तथैव होमकालोपि तेनैव दर्शितः। यावत्सम्यङ्न भाव्यन्ते
नभस्यृक्षाणि सर्वतः। न च लोहित्यमायाति तावत्सायं तु हूयते। मरीचिरपि॥ दृश्यमी
मत्सासं ध्यायां सूर्यन क्षत्रदर्शिभिः। होमकालः स विज्ञेयो ह्याग्निगर्भान दामही॥ आ

६

पस्तंबोपि। समुद्रो वा एष यदहोरात्रे तस्यैते गाधे तीर्थे यत्संधी तस्मात्संधौ होतव्यमिति शै
लालि ब्राह्मणं भवति नक्षत्रं दृष्ट्वा प्रदोषे निशायां वा सायमिति सर्वत्रानुवर्तते॥ यत्र
रात्र्यवस्थानं तु तत्साधनं नक्षत्रं॥ एकमपि दृष्ट्वा प्रदोषे निशायां दशायां रीतरे भूतानि॥
अत एव कालोपसवेषु। नयना उकौर्ध्वगामीति॥ एते चत्वारः कालाः॥ तथा प्रातर्होम
कालाअपि तेनैव दर्शिताः। उषस्युपोदयं समया व्युषिते तु दिते वा प्रातरिति। समयो
ध्युषिते अर्धोदिते। मनुरपि। उदितेनुदिते चैव समयाध्युषिते तथा॥ सर्वथा वर्त्तते यज्ञ
इतीयं वैदिकी श्रुतिरिति। एतेषां लक्षणमाह व्यासः॥ रात्रेः षोडशमे भागे ग्रहन
क्षत्रभूषिते। काले त्वनुदिते प्राहुर्होमिकं यौ द्विचक्षणां यथा प्रभातसमये रश्मिनेक्ष

(8)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रमंउक्ते। रविपर्यये न दृश्येत समयाध्युषित स्तत्स्तु॥ रेखामात्रस्तु दृश्येत रश्मिभिश्च समन्वितः। उदितं तं विजानीयात्तत्र होमं प्रकल्पयेत्॥ अनेन रेखादर्शनादारभ्य तृतीयो होमकाल इत्युक्तं भवति॥ अत एव कात्यायनः॥ हस्तादूर्ध्वं रविर्यावद्गिरिं हित्वा न गच्छति॥ तावद्धोमविधिः पुण्यो नान्यो ह्युदितहोमिनां॥ आश्वलायनोपि॥ संगवांतः प्रातरिति॥ होमकाल इत्यनुवर्त्तते॥ अत्र पुलस्त्यः॥ अकाले चेत्कृतं कर्म कालं प्राप्य पुनः क्रिया॥ कालातीतं ततः कुर्यादकृतं तद्धि निर्दिशेत्॥ अकालेऽनागतकाले। अकाले तु तस्यानुपादेयत्वात्। कृतमप्यकृतमेवेत्यर्थः॥ यदा तु कथंचिन्मुख्यकालातिक्रमः॥ तदा गौणेऽभिलेनोक्तं द्रष्टव्यं। अथ यदि गच्छेन्नौसायंप्रातर्होमयोर्दर्शपूर्णमासयोर्वा हिव्यं होतारं वाना

१

धिगच्छेत्कथं कुर्यादिति॥ आसायमाहुतेः प्रातराहुतिर्नात्येत्या प्रातराहुतेः सायमाहुरमावास्यायाः पौर्णमासं नात्येत्या पौर्णमास्याममावास्यामिति॥ अतो गौणेपि काले अतिपन्नं कथं कार्यमिति भावः। ततश्च प्रायश्चित्तानंतरमेव कार्यं यदि सायमग्निहोत्रकाले तिपद्येत्यापस्तंबेन मुख्यकालातिपत्तौ प्रायश्चित्ताभिधानात्॥ आश्वलायनेपि॥ संगवांतः प्रातस्तमतिनीय चतुर्गृहीतमाज्यं जुहुयात्॥ एतच्च गौणकालानुष्ठानमापद्विषयं॥ गौणकालाद्यतिक्रमे प्रायश्चित्तानंतरमेव कार्यं संनमन्येत॥ सर्वेष्वेतेषु होतव्यमापदि हुत्यमेव प्रतीयात्तदित्यापस्तंबस्मरणात्॥ उक्तं च गोभिलेन॥ यदि होतारं वा नाधिगच्छेत्कथं कुर्यादिति। गौणकालाभिप्रायेण कात्यायनोपि। पौर्णमासात्ययेऽहव्यं होता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वापदिनो भवेत्॥ तदहर्जुहुयादेवममावस्यात्यये पिन्वेत्॥ हव्यं हविः॥ होता ऋत्विक्॥ अत्रापि
कृत्वापाधिकृतौ वैश्वानरी वातिपन्नं पर्वकार्यं॥ अग्नयेपथिकृते पुरोडाशमष्टाकपालं निर्वपे
द्योदर्शपूर्णमासयाजीसन्नमावास्यायां पौर्णमासीं वातिपातयेद्वैश्वानरं द्वादशकपालं
निर्वपेदमावास्यां पौर्णमासीं वात्तिपद्येति श्रुतिः॥ एतदपि यावदन्यास्य प्रणोनकालः
तसौ प्रायश्चित्तमेव पुनरत्तिपन्नानुष्ठानं अधिकारोत्तरावरोधेन पूर्वाधिकारनिवृत्तेः॥
उक्तंच भाष्यकारेण। ततो दर्शपूर्णमासं वा यदन्योन्यपर्वकाल एष एव न्यायः सायंप्रात
होमयोरपि। एवंपश्चात् श्रावणीयातिपत्तावपि कृत्वापधिकृतिं वैश्वानरीवात्तिपन्ना
नुष्ठानत्तयोरपि विकारत्वात्॥ अत्रैवेज वापः॥ एतेभ्य उदितहोमास्तुरन्येनुदितहोमि

नः॥ अन्ये भोजनहोमाश्च पक्षहोमास्तथैव च॥ भोजनहोमास्त्वरित्याप द्विषयं॥ एवं पक्ष
होमेपि द्रष्टव्यं। तथा च मरीचिः॥ शारीराप द्वेवघस्तु भयादग्निः प्रजायते॥ तथान्यस्य
पिचापत्सु पक्षहोमो विधीयते॥ आपस्तंबोपि॥ यायावर हवनमपुरा नाम ऋषय आस
न्॥ ते ध्वन्यश्वाम्यन्। ते अर्द्धमासायाअर्द्धमग्निहोत्रं जुहुवुस्तस्माद्यायावरधर्मेणामयाद्या
न तौ वा ध्वनिवापसु वार्द्धमासांसार्द्धमासायाग्निहोत्रं जुहुयात्॥ प्रतिपदि सायं चतुर्दश
चतुर्गृहीतान्येकास्मिन्सकृद्धोमः सकृत्याणि मार्जनं। सकृदुपस्थानमित्येवं प्रीतिरिति
पक्षहोमे मध्ये त्वापन्निवृत्तौ पुनर्होमो न दोषायेत्याह मरीचिः॥ पक्षहोमानथोदत्यागत्वा
कस्मान्निवृत्तयः॥ होमं पुनः प्रकुर्याच्चेन्नचासौ दोषभाग्भवेदिति। तथापि समस्य

स्थक

होमोपि तेनैवद र्शितः ॥ प्रवासे वाग्निहोत्रीय रिग्नं पंचाइ श्च्वसमवा । दातव्याहोमए काहे सायं
प्रातः पृथक् ॥ अत्र द्रव्य नियममाह कात्यायनः ॥ कृतमोदक संस्कांतं दुव्यादिकृताकृतं व्री
ह्या दिवाकृतं प्रोक्तं मितिहव्यं त्रिधाबुधैः ॥ स्मृत्यंतरेपि । तैलंदधिपयः सोमायवागूरोदनो
घृतं । तंदुलामासमाषश्चदशद्रव्याणि कामतः कात्यायनोपि । हविष्येषु यवामुख्यास्तदनु
व्रीहयः स्मृताः स्मृताः ॥ अभावे व्रीहियवयोर्दध्नावापयसापिवा ॥ तदभावे यवाग्वावा जुहुयादुदकेन
वा ॥ शौनकोपि ॥ कामंतु व्रीहियवतिलैरिति ॥ मुख्यद्रव्याभावेतुकात्यायनोक्तं द्रष्टव्यं । यथोक्तव
स्तुसंपत्तौ ग्राह्यं तदनुसारिवा ॥ यवानाम पिगोधूमा व्रीहिणामिव शालयः ॥ यत्तुन द्रव्याति
शेषाणांमानं तत्रापि सरावाह ॥ आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ॥ मंत्रस्यदेवता 11

यास्तुप्रजापतिरितिस्थितिः ॥ अथाहुतिपरिमाणमाह ॥ तथाच बृहस्पतिः ॥ प्रस्थानैंचतुः च
ष्टिराहुतेः परिकीर्तितं ॥ तिलानांतुदर्धंस्यात्तदर्धंस्याद्धृतस्यच ॥ बौधायनोपि ॥ व्रीहिणां
वायवोनांवाशतमाहुतिरिष्यते । नियमस्तुस्वगृह्योक्तविधीना ॥ तदुक्तं गृह्यपरिशिष्टे ॥
स्वगृह्योक्तेन विधिना होमंकुर्यायथाविधि ॥ यथाविधियथाशास्त्रमित्यर्थः ॥ तत्कथमि
त्यपेक्षते ॥ शातातपः ॥ तीर्थयितनसंपूर्णप्रातरुत्तानपाणिना ॥ अंगुलसमिधोनित्यंसर्व
त्रजुहुयाद्धविः ॥ विष्णुरपि ॥ अप्रबुद्धे सधूमेवा जुहुयायोहुताशने ॥ यजमानो भवेदंधः सोम
सूत्रेतिनःस्मृतं ॥ योनर्चिषिजुहोत्यग्नौ व्यंगारेचैवमानवाः ॥ मंदाग्निरामयावीचदरिद्रश्चो
पजायते ॥ अतश्च । बहुशुष्कैधनेचाग्नौसुसमिद्धेहुताशने ॥ विधूमेलेलिहानेचहोतव्यं

(१२)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मसिद्धये॥ आपस्तंबोपि। यदंगारेषु व्यवशांतेषु लेलायद्वी विभाति तद्देवानां मास्यं तस्मा
त्तथा होतव्यं यथास्येपि दधात तव्यंतदिति विज्ञायत इति। व्यवसांतेषु चिर्विरहितेषु लेलाय
द्वी विभाति॥ दीप्यमानं विभातीवेत्यर्थः। यस्य पुनः श्रोताग्निस्मार्तश्च तस्यात्तुन्ने विशेषमा घ
ह भारद्वाजः। होमं वैताग्निके कृत्वा स्मार्ते कुर्याद्विचक्षणः। श्रुतीनां वेदमूलत्वात्स्मार्ते कि
चित्पुराविदुः॥ वाग्ताततयोपि॥ श्रौत्तं यत्नात्स्वयं कुर्यादन्यपि स्मार्तमाचरेत्। अशक्तौ श्रौ
तमप्यन्यः कुर्यादाचारमंत्रतः। एतच्छ्रद्धालैवानुष्ठेयं। अन्यथा दोषश्रवणात्॥ तथाचां
गिराः। स्वाभिप्रायकृतं कर्म यत्किंचिज्ज्ञानवर्जितं॥ क्रीडाकर्मेव बालानां तत्सर्वं निःप्र
योजनं॥ चतुर्विंशतावपि॥ हतंज्ञानं क्रियाहीनं हतास्त्वज्ञानिनः क्रियाः। अवश्यतंत्रंतको

१२

ऽथः पश्यन्नपि च पंगुकः॥ यद्यात्प्रमादात्कर्मप्रच्युतिस्तदा प्रजापतिनोक्तं द्रष्टव्यं। प्रमा
दात्कुर्वतां कर्म प्रच्यवत्य ध्वरेषु यत्॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः॥
अध्वरेषु यज्ञेषु॥ अत्र कूर्मपुराणे॥ ब्रह्मण्याधाय कर्माणि निःसंगः कामवर्जितः॥
प्रसंन्नेनैव मनसा कुर्वाणो याति मत्पदं॥ ब्रह्मणि आधानं ब्रह्मार्पणं। तदपि तत्रै
वोक्तं॥ ब्रह्मणा दीयते देयं ब्रह्मणा संप्रदीयते॥ ब्रह्मैव दीयते चेति ब्रह्मार्पणमि
दं परं॥ नाहं कर्ता सर्वमेतत्। ब्रह्मैव कुरुते तथा॥ एतद्ब्रह्मार्पणं प्रोक्तं ऋषिभिस्त
त्वदर्शिभिः। प्रीणातु भगवानीशः कर्मणानेन शाश्वतः। करोति सततं बुध्या ब्रह्मा
र्पणमिदं परं। यद्वा फलानां संन्यासं प्रकुर्यात्परमेश्वरे॥ कर्मणामेतदप्याहु ब्रह्मार्पण

(12)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुत्तमं। तस्मात्सेवेत सततं कर्मयोगं प्रसन्नधीः॥ तृमये परमे चास्य तमदं यातिशाश्वतं
इतिस्मृतिचंद्रिकायां होमविधिः॥ ॥अथोपवसथस्य नियमः॥ तत्रपुलस्त्यः॥ सकृत्ने
रणिसार्पेष्यमुध्य विष्वंरघुभोजनं॥ नसायनोपवासः स्यात्तैलामिषविवर्जितं। विशेष
माहापस्तंबः॥ अत्त मिश्रान्नस्य यथेतयोः श्रिपस्यात्तदेतदस्मिन्नहनि भुंजीयातांमधश्च
शय्यायात्मानमिति। अत्रवज्वीन्याहहारीतः। माषमसुरमधुमांसपरान्नमैथुनानि
च अहन्यहनिवर्जयेदिति॥ प्रत्याहरन्वाधानदिनं॥ भरद्वाजोपि॥ वर्जयेत्पूर्वकाले
तुस्त्रीतैलामिषवक्षजं॥ सांख्यायनोपि। कलहं क्रितविक्रीतंप्रहासंबहुभाषणं॥ च्यौ
र्यंत्रिकंच थाराव्यांयक्ष्यमाणो विवर्जयेत्॥ जाबालिरपि॥ कथारकोन्नकुलत्था

१३

कोरदूषकान्॥

श्चवर्जयेत्कोद्रवांस्तथा। अन्नंतंबहुवादंच क्रयविक्रममेवच। दंतशौचंच पूर्वेद्युर्यागस्ये
तानिवर्जयेत्॥ मसुरान्लवणक्षारान् चणकान्कोरदूषकान्॥ माषान्नमधुपरान्नं
चवर्जयेत्पर्वणि द्विजः॥ गृह्यपरिशिष्टेपि॥ साकमांसमसूरांश्च चणकान्॥ माषान्म
धुपरान्नानि वर्जयेदौपवसथ्यके। बौधायनोपि। सर्वमेवैतदहः कोशीधान्यं वर्जयेदन्य
त्रतिलेभ्य इति॥ इतिस्मृतिचंद्रिकायां औपवसथ्यनियमः॥ अथपुनराधाननिमि
त्तानि॥ ॥ तत्रकात्यायनः॥ विवाहाग्निंस भार्यश्चेत्सीमामुल्लंघ्य गच्छति॥ होमकाला
त्ययेतस्य पुनराधानमिष्यते॥ शौनकोपि। अग्नावनुगतेयत्र होमकालद्वयं व्रजेत्॥
उभयोर्विप्रवासेवा लौकिकेग्नौ विधीयते। प्रोषितेत्वनुयदापत्नीयदिग्रामांतरंव्रजेत्॥

(13)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

होमकालेयदि प्रामान्नसादोषेणयुज्यते ॥ अथतत्रैवपवसतिकालव्यतिक्रमः । लौकि
केग्नौ विधीयेत काठकश्रुतिदर्शनात् । यजमानश्चपत्नीचउभौप्रहोमवसतोयदि ॥
आहोमान्तमनिवर्त्तेतां पुनराधानमर्हति ॥ अपस्तंबोपि । यदिपत्नीसीमांतआदित्योस्तमि
याद्भ्युदियाद्वापुनराधेयं ॥ तस्यप्रायश्चित्तंनास्ति यजमाने ग्राममर्यादामग्निंननि
हरेयुर्यद्यपिहरेयुस्तेलौकिकाःसंपद्येरन्नित्यथयावंत्योग्राममर्यादानद्यःस्युःस्ताव्यति
क्रमंतावन्यारभेयातांआयंतयोर्वायदिवान्यारभेयातांलौकिकाःसंपद्येरन्निति ॥
शौनकोपि ॥ होमद्वयात्ययेदर्शपूर्णमासात्ययेतथा ॥ पुनरेवाग्निमादध्यादितिभा
र्गवशासनं ॥ धार्यमाणेग्नौ चतुरहादूर्ध्वमपिहोमविच्छित्तौपुनराधानमि [illegible] ॥ १४

त्यापस्तंबमिति ॥ आश्वलायनोपि । सर्वाश्चेदनुगतानादित्योभ्युदियाद्वास्तमियाद्
वाग्न्याधेयं पुनराधेयंवासमारूढेषुचारणीनाशेइति । रातद्द्वतादग्निविषयमिति
क । श्चिद्व्याख्यातं । आपस्तंबोपि । यस्यचोभावनुगतावभिनिम्रोचेदभ्युदियाद्वापु
नराधेयं । तस्यप्रायश्चित्तिरिति ॥ उभौगार्हपत्याहवनीयौ ॥ तथायदिपक्षहोमेन
पक्षद्वयमतीयात्पुनराधेयं । तस्यप्रायश्चित्तमिति शौनकोपि ॥ दैविकोथौपिक
श्चैवस्वेदार्थयोग्निरुद्धृतः ॥ सर्वेतेलौकिकाज्ञेयामुक्त्वाग्नौविगतेसति ॥ रातप्र
मादोद्धृताग्निविषयं ॥ पैठीनसिरपि ॥ प्रवत्सीकृतधर्मस्यपीड्यमानस्यशत्रुभिः ॥
मासद्वयंप्रवासोस्ति परतोनाहिताग्निवदिति ॥ इतिस्मृतिचंद्रिकायां [illegible] पु

(15)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नराधाननिमित्तानि ॥ ॥ अथाग्निहोत्रप्रसंगादन्यदपि तद्विषयं किंचिदुच्यते ॥
तथा च याज्ञवल्क्यः ॥ दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः ॥ आहरेद्विधि
वद्दारान् अग्नींश्चैवाविलंबयन्निति । वृत्तवतीमाचारवतीं । सा च यदि सवर्णा तथा
च मनुः ॥ एवंवृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वमारिणीं दाहयित्वाग्निहोत्रेण यज्ञपा
त्रैश्च धर्मवित् ॥ एवंवृत्तामुक्ताचारां अनेनैवोक्तं ततो सवर्णाया अग्निहोत्रं निषि
सत्यामेव ध्यते ॥ किंतु सवर्णायां ॥ अन्यथा तस्या अप्यधिकारसंभवात् ॥ यथा च याज्ञव
ल्क्यः ॥ सत्यामन्यां ॥ सत्यामेव सवर्णायां धर्मकार्यं न कारयेत् ॥ सवर्णायां सत्यामन्यामसवर्णां
न्यामसवर्णां तु धर्मकार्यं न कारयेत् ॥ तया सह धर्मं नाचरेदित्यर्थः ॥ अनेना १५

सत्यां सवर्णायामप्यधिकार इत्यर्थादुक्तं भवति ॥ एतदेव वसिष्ठोपि ॥ शूद्रयैव सह धर्मानु
ष्ठाने निषेधमाह ॥ कृष्णवर्णा या वैरामा रमणायैव न धर्मायेति ॥ कृष्णवर्णा या शूद्रा ॥ सव
र्णानेकत्वे तु चिता ज्येष्ठया तया सह धर्ममाचरेत् ॥ किंतु सहैव ज्येष्ठया ॥ तथा च याज्ञव
ल्क्यः ॥ सवर्णासु विधौ प्रथमे इति ॥ विधौ ज्येष्ठया विनान्येतरान् सह धर्मचारिणी त्वित्याख्ये
यं शंकनीयं ॥ एतत् आह कात्यायनः ॥ नैकयापि विना कार्यमाधानं भार्यया द्विजैः ॥ अकृतं
तद्विजानीयात् सर्वा नान्वारभंतिय तत् ॥ यद्यस्मात् सर्वाः स्त्रिय आधीयमानमग्निं नान्वा
रभंतीत्यर्थः ॥ आपस्तंबोपि ॥ आधानेपि सति कर्मभेदः ॥ संपद्यत इति । बौधायनोपि ॥ एकैका
मेवासां सन्नह्येदिति ॥ अतो ज्येष्ठया सहैवेतरासामप्यधिकारो न विना ज्येष्ठयेति सिद्धं ॥ (15)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदपि ज्येष्ठायामदुष्टायां ॥ अत एव कात्यायनः ॥ ज्येष्ठायां दोषहीनायां कनीयस्यां यदाग्निमा
न् ॥ ब्रह्महत्या भवेत्तस्य प्रतिपर्वं हि सर्वदा ॥ दोषदुष्टायां परित्यज्यान्यया सह धर्मं चरेदिति
भावः ॥ तथा च दक्षः ॥ धर्मपत्नी समाख्याता नि×तुत्तां×दोषाय दि सा भवेत् ॥ दोषे सति न दो
ष स्यादन्या कार्या गुणान्विता इति ॥ यत्तु वृहस्तुनोक्तं ॥ अग्निहोत्रादिधर्मेषु द्वितीयां न सहाच
रेत् ॥ अन्यथा निःफलं तस्य दृष्टेः ऋतुशतैरपि ॥ तदसवर्णा द्वितीयादिविषयं ॥ ज्येष्ठायाम
नुष्टायां केवले द्वितीयाविषयं वा ॥ अथवा पूर्ववचनविरोधात् ॥ तदपि कात्यायनेनोक्तं ॥ प्र
थमा धर्मपत्नी स्याद्द्वितीया रतिवर्द्धिनी ॥ दृष्टमेव फलं तत्र यादृष्टमुपपद्यते ॥ तदपि वेहुवेन
समानविषयं ॥ नन्वाहिताग्नेः पुनरुद्वाहो निषिद्ध एव ॥ तथाहापस्तंब ॥ धर्मप्रजासंपन्ने दारे १६

नान्यां कुर्वीतान्यतरापाये कार्या प्राग्गन्याधेयादिति ॥ मैवं यथा प्राग्गन्याधेयात्त तोऽग्निमपि सति निमि
त्तेषु पुनरुद्वाहः कार्य इति तस्यार्थः ॥ अत एव कात्यायनः ॥ सदारोन्यान्पुनर्दारान्कथंचित्कारणांत
रात् ॥ यदि छेदग्निमान् कुर्वन् क्व होमोस्य विधीयते ॥ स्वाग्नावेव भवेद्धोमो लौकिके न दाचन ॥ न
ह्याहिताग्नेः स्वकर्म लौकिकाग्नौ विधीयते ॥ एतत्पूर्वस्यामधिकारिण्यां यावदन्यो विवाहस्तद्वि
षयं ॥ ऊर्ध्वं विवाहाद्युत्सर्गे साग्नीनुत्सृज्यान्यया सह पुनराधध्यादिति भावः ॥ ननु च यदि पुनः प
रिणीता याप्यग्निहोत्राधिकारस्तर्हि कथं द्वितीयां न सहाचरेदित्यस्य तद्विषयमुच्यते ॥ सत्यं
न तद्विषयं ॥ किं तु यस्याः पुनः प्रजास्त्यादिना पुनरुद्वाहे पि दोषाभावात् ॥ नाधिकारनाशस्त
द्विषयमिति ब्रूमः ॥ अत एव स्मृत्यंतरे ॥ व्याधितां स्त्रीं प्रजावंध्यामुन्मत्तां विगतार्तवां ॥ अद
ष्टां लभते स्वकं तीर्थतो न तु धर्मतः ॥ तीर्थतो योनितः इत्यर्थः ॥ अतो नात्र पुनः द्वितीयपास

(16)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशाधानं। अग्निपरित्यागकरणाभावात्॥ एवंच पूर्वारणी भार्यामग्निहोत्रेण दाहयित्वा योग्यभा
र्यारहितश्चेत् पुनः परिणीय तया सहाधानं कुर्यात्॥ इतरथा आधानमात्रमेवेति मंतव्यं॥ यत्तु
कात्यायनोक्तं॥ मृतायां चेद्भार्यायां द्वितीयायां कथंचन॥ समुत्सृजेदग्निहोत्रं मोहितोऽतो द्विजो
त्तम॥ ब्राह्मणोक्तं विजानीयाद्यश्च कामान्समुत्सृजेत्॥ विधुरोऽपि। द्वितीयां चैव यो भार्यां द
ग्धैतानिकादिभिः॥ तिष्ठत्यां प्रथमायां हि सुरापानसमं हि तत्॥ तदाधाने तु प्रतिष्ठ द्विती
याविषयं॥ अन्यथा अहिताग्निमग्निभिर्दहतीति श्रुतिविरुद्ध प्रमाणं स्यात्॥ नन्वेषा श्रु
तिर्द्वितीयेतरविषयापि युष्टतरा एवमेवं॥ स्मृतिवशान्न श्रुतेः संकोचस्यायुक्तत्वात्॥ मत्क
तस्मृत्यंतरे विषयांतरे संभवेन तत्संकोच एवमुक्तः॥ यत्र पुनर्विषयांतरासंभवस्तत्र तद्वशा
त्संकोचो भवत्येव॥ यथोक्तं कात्यायनेन॥ स्त्री धर्मचारिणी साध्वी मृता दाह्या तथाग्निभिः १८

विपरीता न दाह्या तु पुनर्दारक्रिया तथा॥ यज्ञवल्क्योऽपि॥ दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवती
पतिः॥ वृत्तवतीमाचारवतीमित्यर्थः॥ अत्रेयमग्निव्यवस्था॥ सर्वाधाने लेकभार्यस्य पूर्वभा
र्यामरणात्तत्राग्निहोत्रमुत्सृज्य पुनः परिणीय तया सहाधानं॥ पुनराहरणासामर्थ्ये आ
त्मार्थमग्न्याधानं॥ दारकर्मणि पयधुरशक्त आत्मार्थमग्न्याधेयं॥ दर्शपूर्णमासाग्निहोत्रं आ
ग्रयणार्थं शेषाणि कर्माणि न भवंतीत्यापस्तंबस्मरणात्॥ बह्वृचब्राह्मणमपि तस्मादपत्नी
कोप्यग्निहोत्रमाहरेदिति॥ एवंच यद्दुक्तमन्यैः॥ पत्न्यां रजस्वलायामेतद्वचनमिति॥ तद
प्यापस्तंबः॥ यच्चात्र विधुरेनोक्तं द्रष्टव्यं॥ मृतायामपि भार्यायां वैदिकाग्निं न तु त्यजेत्॥ उपा
धिना पि तत्कर्म यावज्जीवं समापयेत्॥ उपाधिश्चात्र कुशादिमयी पत्नी॥ अन्ये। अन्ये कुश
मे मयीं पत्नीं कृत्वा गृहं धिनः॥ अग्निहोत्रमुपासंते यावज्जीवमनुव्रता इति॥ रामेण कृत्वा सौव

(१७)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्णसी तांप त्नीयशास्विनी ॥ ईजे पर्दैर्बहु विधैः सह भ्रातृसह त्विजइति ॥ सतुसत्याषाढेनोक्तं
नस्वामिलस्यन भार्यायाः पुत्रस्यदोषस्यैका कस्याग्नेर्देवितायाः प्रतिनि धित्वस्यवाच निक त्वा
त् ॥ अतोपत्नैकेष्विदुक्तं ॥ कुशादिया पत्नीकार्यकत्वाभावेनतत्प्रतिनिधित्वासंभवादन्यकु
शमयी मिस्य ग्निहोत्रस्त्क त्पर्थमि ति ॥ तदप्यापस्तंबः ॥ एवं विधानादुप रियजमान मरणेत
स्याग्निहोत्रितायां पितृमेधः आधानेसामर्थ्ये तस्याग्नेताधानमेव तदिति ॥ आपस्तंबेनोक्तं ॥
यथाहिताग्निरुत्सन्नाग्निर्विधुराग्निर्विभुरग्निर्वाप्रणीयेत नतमन्येनत्रेताग्निभ्योदह
ति तस्य प्राचीन निरयज्ञ्यापतनोत्तुद्धत्यावोक्ष्य यजमानापतने प्रेतं निधाय गार्हपत्या
यतने रणीसंनिधायमथ त्तियस्याग्नेपोजुहुतोमासकामाः संकल्पयंतु तेयजमान
मांसं ॥ संध्यायंतुतेषविषेसाधितायस्वर्गंलोकमिमंप्रेतंय स्विति तू हुतीं विहृत्य १८

द्वादशगृहीतेन स्रुचंपूरयित्वा तूष्णीं हुत्वाप्रेतेमाराधाउरयेत दादिकर्मप्रतिपद्यत इति ॥
अत्रैवपूर्वयजमानमरणेतस्याग्निहोत्रितायां पितृमेधः ॥ पत्नीनां तु श्रेताधानमेव ॥ अ
र्धाधाने लौकैर्यस्य पूर्वमरणेतस्याग्निहोत्रितायां पितृमेधः ॥ पत्न्यास्त्वौपासने तयोर्यः
पू भना वें म्रीयेततस्याग्निहोत्रितायां पितृमेधः संपद्यते ॥ यः पश्चात्तस्यौपासन इत्या
पस्तंबस्मरणात् ॥ अत्रैवपूर्वपत्नीमरणेतत्राग्निहोत्रमौपासनं वा सज्यपुनः परिणी
यतपासहाधानं ॥ अथैनमुपोषतीत्यारभ्यपुरस्तात्सभ्यावसथ्याभ्यामौपासनेनवे
स्यापस्तंबेन औपासनस्यापि प्रतिपत्ति विधानात् ॥ पुनस्तस्यमरणेतत्राप्येष राव
न्यायः ॥ पुनर्दाराहरणसामर्थ्यमारमाधर्मग्न्याधानादि ॥ तत्राप्यसामर्थ्यं निश्चयः ॥

(18)

पत्न्यास्त्रेतायामेव पितृमेधः॥यजमानस्य त्वौपासने तस्या अग्नितराभावात्॥यद्येवे श्वातयोपासनइतिस्मरणाञ्च। ननुचात्रार्धाधानपक्षेपित्रयोर्यःपूर्वइतिस्मरणात् अग्नित्रेतायामेवपत्न्याःपितृधनयजमानस्यौपासनएवाधानादिकं नस्यात्॥मेवं सचाग्नयोर्वा रातेयेपत्न्यांमृतायाधार्यतइति॥काठकश्रुत्यातेषांपितृमेधकार्यत्व स्मरणात्॥अतःपूर्वोक्तैवज्यायसी अर्धाधानएवानेकभार्यस्यपूर्वमरणेतस्याग्नि होत्रेतायामेवपितृमेधः॥पत्नीनांतुस्वेस्वेऔपासनाग्नौ इत्युक्तंकल्पभाष्ये॥स्वेस्वेऔ पासनस्याग्नेरंशौवस्यादुपोषणं॥अत्रैवपूर्वपत्नीमरणेतत्राग्निहोत्रमौपासनंवोत्सृ ज्यपुनर्द्वितीययासहाधानादि॥यदातुयुगपदेवजायापत्योर्मरणंतदानयोःसहैव

११

पितृमेधः॥तदुक्तमापस्तंबेन सहैवप्रेतसहैवपितृमेधो द्विवचनलिंगिनां आसस्तमती ति॥अनादिनास्यौपासनेनैवपितृमेधः॥तदपितैनेवोक्तं॥औपासनेनाहिताग्निंदहति निर्मथ्येनपत्नीमुत्तमेनेतराग्निति॥इतरान्ब्रह्मचारीप्रभृतीनामित्यादि॥समारूढेष्व ग्निषुयजमानमरणेतेनैवोक्तं॥यद्यारमनिमरणीष्वरण्योर्वासमारूढेष्वग्निषुयजमानम रणंपूर्ववदायतनान्युद्धत्याबोध्यस्ययजमानायतनेप्रेतंनिधायगार्हपत्यायतनेलौकिकम ग्निमुपसमाधायप्रेतस्यदक्षिणंपाणिमपिधायपुत्रोभ्रातावाऽन्योवाप्रत्यासन्नोवधुरुपावरो हयेति प्रत्यवरोहजातवेदइत्यरण्योरुपावरोह्यमंथेद्यद्यरण्योःसमारूढस्यान्निवर्त्तमा नेप्रेतमन्वारंभयित्वैनंमंत्रंजपेद्धिरण्यादिसमानमिति॥इतिस्मृतिचंद्रिकायांहोमकां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इसमाप्तं ॥ छ ॥ श्रीपद्मगुरुपायनमः ॥

२०

KKSU LIBRARY
RAMTEK
441 106
M-1253
Dist Nagpur

२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.10.20 15:01
,TRANSFERRED=2020/10/23 at 15:04:47
,PAGES=20
,TYPE=STD
,NAME=S0004489
,Book Name=M-1253-SMRITI CHANDRIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection